# पुरुषसूक्तीयसप्तपरिधीनां प्रपञ्चोत्पत्तिप्रकारको विचारः

Dr. K.N. Harikrishna Sharma
Asst. Professor,Dept.of Sanskrit, Sree Sankara College, Kalady

Submitted on: 03/08/2020 Revised on:24/08/2020 Accepted on: 26/08/2020

ऋग्वेदीयं षोडशर्चं पुरुषसूक्तं प्रथितमनल्पम्। जगत्सृष्टेः काव्यात्मिकी व्याख्याऽस्मिन्नुपलब्धा। ऋग्वेदे दशममण्डले दशममिदं सूक्तं आथर्वणे ऊनविंशतितमे काण्डे षष्ठे समावर्तेतायजुर्वेदेऽप्येकत्रिंशत्तमोऽध्यायः पुरुषसूक्तमिति ख्यातः। सामे तु तत्र तत्र पुरुषसूक्तमन्त्रेष्वन्यतमाः केचन दरीदृश्यन्ते। सूक्तस्यास्यर्षिर्नारायणो देवता पुरुषश्च। इयं सृष्टिर्विराट्पुरुषस्य विकासरूपेति निरूप्य तस्य विकासस्य प्रकारः कीदृश इतीह विचार्यते। प्रपञ्चस्य भौतिकी मानसिकी सामुदायिकी च सृष्टिः कस्माद्धेतोर्बभूवेति भावनात्मिकया शैल्या सूक्तेऽस्मिन् प्रतिपाद्यते। सृष्टिर्यज्ञरूपेत्यनया व्याख्यया प्रपञ्चरचनायाः यौक्तिकः कश्चन प्रकारः क्रमो वा विवक्षित इति गम्यते।

## सृष्टिप्रकारकल्पना

पिण्डब्रह्माण्डयोस्सादृश्यं शास्त्रैस्तज्ज्ञैश्च चर्चितमेव। यथा शरीरे चेततनावत्त्वेनात्मनोऽस्तित्वमनुभूयते तथा ब्रह्माण्डस्य व्यवस्थापितत्वमनुभूय व्यवस्थापकसत्त्वमनुभूयते। पिण्डे या व्यवस्थाऽनुभूयमाना तदपेक्षया ब्रह्माण्डेऽनुभूयमाना व्यवस्था बृहता केनापि व्यवस्थापकेन व्यवस्थापितैवेत्यसन्देहः। प्रपञ्चविकासः नियतं कमपि नियममनुसरति।सोऽयं नियमः धिया कयाचित्प्रचोद्यमानापि स्यात्।प्रकृतिर्न धीमती जडत्वात् । न जीवोऽपि प्रचोदकस्स्यात् ; पिण्डापेक्षयाऽनन्तस्यास्य ब्रह्माण्डस्य विकासपरिणामौ नाल्पज्ञेनाल्पशक्तिमता वा नियम्येते; किन्तु विभुना परमात्मनैव। तस्मात् परमात्मनैव जगत्सृष्टेर्विकासादयस्सञ्जाता इति वैदिकमतम् । प्रवृत्तिः धृतिः निवृत्तिश्च तामिमां धियं धीमन्तञ्चाश्रित्य वर्तन्त इत्यनूच्यते। प्रवृत्तिनिवृत्ती विपरीतधर्मौ स्त इत्यतः तयोर्निरवधिकत्वं न युक्तम् ।यदि प्रकृतेः स्वतन्त्रसत्ताकत्वमङ्गीक्रियते तर्हि तस्याः प्रवृत्तिर्यान्त्रिकी स्यात्। प्रवृत्तिश्चेदृज्वी प्रवृत्तिः निवृत्तिश्चेदृज्वी निवृत्तिरेव स्याताम्। सृष्टेः प्रलयस्य चानुक्रमः यान्त्रिकतायाः नैव भवेदित्यतः नियामकस्य कस्यचित्सत्त्वं जगति वर्तत इति वैदिकाः भणन्ति। तदिदं नियामकं चैतन्यं पुरुषाख्यमिमं विश्वं व्यरचयद्धारोपसञ्जहार च। विश्वस्यान्तश्चेतना पुरुषः विश्वस्तु तच्छरीरञ्चाभवत्। प्राक्सृष्टेस्तु विश्वे मूलरूपेऽवस्थिते पुरुषे तस्यान्त आत्मत्वेन बहिरावरकत्वेन चावर्तत। तदानीं प्रकृतौ क्षोभस्संभूतः, सेयमवस्था जलस्येवेत्यतः क्षुब्धां तां आपः, अंभः, सलिलं चेत्युपवर्णयामासोपलक्षणत्वेनातत्र भूरादित्यादयो वृक्षा

बीजेभ्य इवाजायन्त। तस्यामपि बीजप्रकृत्यां अन्तरात्मा पुरुषोऽध्यास्तासोऽयं हिरण्यगर्भः, प्रजापतिरित्यादिभिर्नामभिर्विश्रुतः। ततश्चादित्यचन्द्रमसादिष्वनन्तरमुत्पन्नेषु तत्तत्कार्येष्वभिव्यापृतेष्वभिव्यक्तेषु जगत्सु तस्य पुरुषस्य शरीर इवायं विश्वः दरीदृष्टः। एवं सहस्रशैरङ्गैस्सहस्रकर्मसु व्यापृतः विराट्पुरुष इति ख्यातः। वैराजं तमिमं देहं प्रस्तुत्य -

भूः पादौ यस्य नाभिर्वियदसुरनिलः चन्द्रसूर्यौ च नेत्रे
कर्णावाशाशिरो द्यौर्मुखमपि दहनो यस्य वास्थोयमब्धिः।
अन्तस्थं यस्य विश्वं सुर-नर-खग-गो-भोगि-गन्धर्व-दैत्यैः
चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥[1] इति वर्णना।

**सप्तपरिधयः**

तस्यास्य विराट्पुरुषस्य प्रवृत्तिर्विराड्यज्ञसंज्ञया निरूपिता। तस्माद्यज्ञाद्वेदा उत्पन्नाः। वेदेषु विराड्ज्ञानं प्रकाशते। तेन ज्ञानेन चिकीर्षवः प्रवृत्तिधर्मनिरतास्सन्तः तमुपासन्ते। यथा सूर्यचन्द्रमसादीनां नेत्रादित्वं तथा ब्रह्मक्षत्रादीनां शिरोबाह्वादित्वम्। एवं जगति सर्वं चराचरं व्यष्ट्या समष्ट्या च विश्वयज्ञे संप्रवृत्तम् । अनेन यज्ञकल्पनेन विश्वसंरचनायाः विशिष्टाः केचनांशा अपि संसूचिता इति प्रतिभान्ति।

भुवनभवनाय प्रवृत्तमिदं यज्ञमेवं पुरुषसूक्ते विशिनष्टि -

'''सप्तास्यासन् परिधयःत्रिस्सप्त समिधः कृताः
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ''[2] इति

**छन्दस्सप्तकम्।**

सृष्टियज्ञस्य सप्तपरिधयः गायत्र्यादयस्सप्तच्छन्दांसीति केचन व्याख्यातारः।''अस्य साङ्कल्पिकस्य यज्ञस्य गायत्र्यादीनि सप्त छन्दांसि परिधय आसन् । ऐष्टिकस्याहवनीयस्य त्रयः परिधय औत्तरवेदिकास्त्रय आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः। अत एवाऽऽम्नायते- '' न पुरस्तात्परिदधात्यादित्यो ह्येवोद्यन्पुरस्ताद्रक्षांस्यपहन्ति'' इति। अत एव आदित्यसहिताः सप्त परिधयोऽत्र सप्तच्छन्दोरूपाः'' इति [3]।

वैदिकानि छन्दांसि उक्था, अत्युक्था, मध्या, प्रतिष्ठा, सुप्रतिष्ठा, गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, अतिगजती, शर्करी, अतिशर्करी, अष्टिः, अत्यष्टिः, धृतिः, अतिधृतिः, कृतिः, उत्कृतिः, प्रकृतिः,आकृतिः, विकृतिः, संकृतिः इति षड्विंशतिः। एतेषु सप्तच्छन्दांसि (गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती) प्राधान्यं भजन्ते[4]। अस्य सप्तकस्य उपच्छन्दांस्यपि भवन्ति[5]। एकैकस्यापि देवतास्वरवर्णगोत्रादयश्च -

अग्निः सविता सोमो बृहस्पतिर्वरुण इन्द्रो विश्वेदेवाः।[6]
स्वराः षड्जादयः।[7]
सितसारङ्गपिशङ्गकृष्णनीललोहितगौरावर्णाः।[8]

अग्निवेश्यकाश्यपगौतमाङ्गिरसभार्गवकौशिकवासिष्ठानि गोत्राणि।[९] इत्यादिभिः सूत्रैः वर्णिताः।

**मर्यादासप्तकम्।**

परिधिशब्दे मर्यादार्थे स्वीकृते तु प्रकरणेऽस्मिन्नृग्वेदीयो सप्तमर्यादाविस्तरः प्रतिपाद्यत इत्यपि निरूपयितुमविरोधः।तद्यथा -

सप्तमर्यादाः कवयस्ततक्षुःतासामेकामिदभ्यंहुरोगात्।
आयोर्हस्कंभ उपमस्य नीले पथां विसर्गे धरुणेषु तस्थौ॥[१०] इति।

मेधाविनो ऋषयः कामादिजन्याः सप्तपरिधयः मर्यादाः अनुल्लङ्घिताः। ये तानुल्लङ्घितुमुत्सहन्ते तान्निरोद्धुं अग्निनाऽवस्थीयत इत्यर्थः।ताश्च परिधय भाष्योक्ता एवं - ''कामजेभ्यः क्रोधजेभ्यश्चोद्धृताः पानमक्षाः स्त्रियो मृगया दण्डः पारुष्यमन्यदूषणमिति सप्तमर्यादाः''[११]। ''स्तेयं गुरुतल्पारोहणं ब्रह्महत्यां सुरापानं दुष्कृतकर्मणः पुनःपुनः सेवां पातकेऽनृतोद्यम्''[१२] इति निरुक्तोक्तं मर्यादासप्तकम्।

**आदितेयासप्तकम्**

विश्वरचनायज्ञस्य प्रतिपादनेऽस्मिन् सन्दर्भे यज्ञाङ्गभूतस्याग्नेरनितरसाधारण्येन तत्संबद्धा एव परिधय इति च मन्तुमुपपद्यते। यज्ञात्संभूतमिदं जगत् स्वायतनेनाग्निनैव न्यस्तपरिधिकमिति व्याख्यातुं न काप्ययुक्तिः। प्रमाणीक्रियते चेत्थं -

सप्तस्वसूररुषीर्वावशानो विद्वान्मथ्व उज्जभारादृशेकम्
अन्तर्येमे अन्तरिक्षे पुराजा इच्छन्वव्रिमविदत् पूषणस्य[१३] इति।

यज्ञात्संभूताः अग्नेस्स्वसारः इह वर्ण्यन्ते। अग्निः ताः यज्ञादुज्जहार ऊर्ध्वं हृतवान् यस्मात् विश्वोऽयं जातः।किमर्थं उज्जहारेति भाष्यकारैरुच्यते - '' किमर्थम्। कं सुखेन दृशे सर्वेषामेव पदार्थानां दर्शनार्थम्''[१४] इति। ताश्च स्वसारः प्रसिद्धाः-

काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्तजिह्वाः॥[१५]

**समीक्षा**

प्रपञ्चस्य परिधिसङ्कल्पः प्रपञ्चोत्पत्तिविज्ञानीये जिज्ञास्यं कमपि तलमुद्घाटयन्नस्ति। वेदान्तदर्शनस्याधारेण ब्रह्मणः एकदेशस्थायां मायायां प्रपञ्चस्यावस्थितिः। किं तादृशस्य प्रपञ्चस्य परिधिः सूक्तेऽस्मिन् विचार्यते उत मिथ्याभूतोऽयं प्रपञ्चः कस्यामवस्थायां उत्पद्यतेऽवसीयते चेति प्रदर्श्यत इत्यवधेयः। छन्दः, मर्यादाः, आदितेयाः इति परिधित्रयं इह चर्चितम्। प्रपञ्चसृष्टौ अस्य त्रयस्य स्थानं यथायुक्तं वर्तत इति पञ्चदशर्चा निगच्छेत्।

छन्दः गणितीयया युक्त्या संबद्धा तालनिबद्धा च वर्तते। तन्न केवलं वर्णैरेव संबद्धा किन्तु जगच्चलनेन च। माहेश्वरसूत्राणामितिहासनिरूपणेन वर्णानामुत्पत्तेरपि पूर्वं तालात्मकं छन्दः आसीदिति गम्यते। तालञ्च चलनात्मकम्।अस्य प्रपञ्चस्य विकासपरिणामलयादिकं नियतेन केनचित्तालेन प्रचाल्यते। यथा चतुर्दशैस्सूत्रैस्सर्वाणि वर्णानि पारमेश्वराड्डमरोराविर्भूतानि तथा सप्तभिच्छन्दोभिः तालैः क्रमेण जगतोऽस्योत्पत्तिरभूदग्र इति विश्वरचनाप्रकरणेऽस्मिन् संसूच्यत इत्यदोषो वक्तुम्। यथा ब्रह्माण्डस्योत्पत्तिस्तथैव पिण्डाण्डस्यापीत्यतः छन्दसामनुवर्तनं उभयत्रापि समानं स्यात्। पिण्डस्य विकासः किं दशभिर्मासैरिति वैलक्षण्यं स्यादिति सन्दिह्येतातत्र सप्तमादारभ्य पिण्डस्य विकासः व्यक्तीभावं प्रकटयितुमारभत इत्यतः कौषीतकाः सप्तमे मासे सीमन्ताय प्रवर्तत इत्यतश्च योजयेत्। ऋतवश्च षड् चाक्रिकं सन्धिकालमप्याकलय्य इमां छन्दोवृत्तिमनुवर्तते। तथैवोपच्छन्दांसि षड्विंशतिर्नाक्षत्रेण कालचक्रचलनेन सामीप्यं भजत इत्यतः विश्वविकासस्य परिणामदशाः परिधित्वेन संकल्प्य छन्दोवृत्त्या मन्त्रेऽस्मिन्नुद्दिष्टा इति वक्तुं शक्यते।

ता इमाः परिणामदशा अर्वाचीनैरप्यभिमताः[१५]।

तद्यथा -

१. प्रकाशदशा - १३.७ शतकोटिवर्षेभ्यः प्राक् कश्चन महती दीप्तिरभूत्।तस्मात्तु अन्तरिक्षः,गुरुत्वं, अग्निः तत्संबद्धा वैद्युताः अणव इत्येते समजायन्त।

२. रासदशा - प्रथमदशायाः किञ्चिन्निमेषानन्तरं कणानामुत्पत्तिः ततो रासघटकानां तन्मात्राणां च अनन्तरं ३८००० सहस्रमिताः वर्षाः ब्रह्माण्डं शैत्ये आसन्।ततस्तु रासवातकानामुत्पत्तिरभूत्।

३. गोलदशा - ये रासवातकाः उत्पन्नाः ते गोलाकृतिमवाप्य घनीभूय आकाशगङ्गादिरूपं प्रापुः। ततः सार्थचतुश्शतकोटिवर्षेभ्यः परं पृथिवीसूर्यादीनि जातानि।

४. जैवदशा - गोलदशायाः परं चतुश्शतकोटिवर्षानन्तरं भूमौ जीवसन्धारणं जातम्।सूक्ष्मप्राणिन एककोशजीविन उत्पन्नाः। क्रमशस्ते कोशाभिवृद्धिं प्राप्य सङ्कीर्णजीविवंशानाम् उत्पत्तये प्राभवन्।

५. सहकृतपरिणामदशा - भेदेनोत्पन्नाः प्राणिनः कालान्तरे परस्परं मिलित्वा साङ्कर्यजानां नवीनानां वर्गाणामुत्पत्तिरभूत्। ते च पूर्वतोऽपि सङ्कीर्णप्रकृतय आसन्। एवं प्राणिवंशानाम् अभिवृद्धिर्वैविध्ययुता जाता।

६. सांस्कृतिकपरिणामः - दैहिकस्य जैवपरिणामस्य प्रभावेन भाषा, संस्कृतिः, चिन्ता, कला, विज्ञानमित्येते इत्येते अंशाः संभूताः। ते तु प्रपञ्चस्य परिणामदशायां वैचित्र्यं समाकलयन्तस्सन्ति।

७. प्रबुद्धदशा - संस्कृतेः विज्ञानस्य च विकासेन प्रपञ्चस्य सारभूतमंशं प्रति चिन्ताः जाताः। ततः तत्त्वचिन्ता तत्प्रेरिताः अभ्यासाश्च समभवन्। एवं विश्वस्यैकनीडत्वं विजानन्तः केचन प्रबुद्धाः तत्त्वज्ञानिनः प्रपञ्चविकासस्य अनन्तरा काचन दशा प्रदर्शिता। सा च पूर्वाभ्यो दशाभ्यः

भिन्ना स्वीयेच्छाधीना चेति ते प्रबोधयामसतुः; तैश्च सा दशा समनुभूता।

प्रपञ्चविकासस्य इयं दशा केनापि छन्दसा पूर्वोक्तसदृशेन वर्तत इति विस्पष्टम्।प्रतिच्छन्दः परिधित्वं भजते। सप्तमर्यादाः दृष्टपूर्वाः सप्तमदशायाः अन्तिमपरिधेः विशेषाः स्युः ; पूर्वेषां गुणाः उत्तरेषु संगृहीतत्वात्। प्रकाशः द्रव्यतां भूततां प्राणित्वं चाप्नोतीति सम्मत इत्यतः आदितेयं परिधिसप्तकमपि प्रकरणेऽस्मिन्नुपरिचिन्तायै युज्यते। भाष्यञ्चानुसरति '' '''मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्'' इति मन्त्रान्तरे दर्शनादादित्यात्मनाग्निः स्तूयते। कामयमानः सूर्यात्माग्निः सप्तसंख्याकान् स्वसॄः रश्मीन् मध्वः समुद्रोदकादुद्धृतवान्। ततोऽन्तरीक्षे विद्युदात्मना स्थित्वा वृष्टिलक्षणं रूपं पृथिव्याः प्रायच्छदिति''१७। अत्र सलिलं इति शब्देन परिणामस्य प्राथमिकदशायां यदव्यक्तमसच्छब्दवाच्यं आसीत् तदेवोच्यत इति गम्यते।अतः यो विकासक्रमः छन्दोबद्धः सूक्तेऽस्मिन् काव्यशैल्या कल्पितः तस्य साङ्गत्यं पञ्चदशर्चा व्यक्तीभूतमिति स्पष्टम्।